**पथ्यावक्त्र** न० "युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्त्तितम्" वृ०र० उक्तलक्षणे मात्रावृत्तभेदे । [पपाद पेदतुः ।

**पद्** स्थैर्ये भ्वा०पर०सक० सेट् । पदति अपादीत् अपदीत् ।

**पद** गतौ दि० आ०सक०अनिट् । पद्यते अपादि पेदे पन्नः

आ+विपत्तौ आपत्तौ च णिच् आपादन व्यापकाभावेन व्याप्याभावकल्पने प्राप्तौ च ।

उद्+उत्पत्तौ उद्भवे जनने अक० ।

प्रति+उद् झटित्युद्भवे अक० ।

वि+उद्–शब्दस्यावयवार्थबोधने व्युत्पत्तिः ।

उप+युक्तियोगे उपपद्यते उपपत्तिः ।

अभि+उपसान्त्वने । कुमा० ४श्लोकः

निस्+निष्पत्तौ अवस्थान्तरप्राप्तौ अक० ।

प्र+प्राप्तौ सक० । प्रपन्नः

प्रति+स्वीकारे अङ्गीकारे सक० प्रतिपत्तिः प्रतिपन्नः ।

वि+प्रति+संशये सक० विप्रतिपन्नः ।

वि+मरणे नाशे अक० । विपद्यते विपन्नः विपद् ।

सम्+सम्यग् वृद्धौ अक० सम्पद्यते सम्पद् ।

**पद** गतौ अद० चु०आत्म०सक० सेट् । पदयते अपपदत ।

**पद्** पु० पद्यते गच्छत्यनेन करणे क्विप् । पादे "पदादयः पृथक् शब्दा इत्येके "पदङ्घ्रिश्चरणोऽस्त्रियाम्" अमरः ।

**पद** न० पद–अच् । १व्यवसाये २त्राणे ३स्थाने ४चिह्ने ५पादे ६वस्तुनि च अमरः । ७विभक्त्यन्तशब्दभेदे "सुप्तिङन्तं पदम्" पा० । ८वाक्यैकदेशे च "वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" सा०द० । ९श्लोकचरणे १०किरणे पु० मेदि० ११अर्थबोधकशक्तिविशिष्टे नैयायिकाः "वृत्तिमत्त्वं पदत्वमिति" तल्लक्षणात् ।

**पदक** त्रि० पदं वेत्ति क्रमा०वुन् । १वेदमन्त्रपदविभाजकग्रन्थस्याध्येतरि २तद्वेत्तरि च ३गोत्रप्रवर्त्तकर्षिभेदे पु०ततः अपत्ये इञ् पादकि तदपत्ये पुंस्त्री० । यस्का० बहुत्वे लुक् । पदकास्तद्गोत्रापत्येषु ।

**पदकार** पु० पदं पदविभागं करोति कृ–अण् उप०स० । वेदानां मन्त्रपदविभाजकग्रन्थकर्त्तरि ।

**पदक्रम** पु० ६त० । वेदमन्त्राणां पदविभाजकक्रमे । तमधीते वेत्ति वा उक्था०ठक् । पादक्रमिक तद्ग्रन्थाध्येतरि तद्वेत्तरि च त्रि० ।

**पदक्रमक** न० पदं क्रमश्च तौ वेत्त्यधीते वा वुन् । १पदक्रमयोर्वेत्तरि २तद्ग्रन्थाध्येतरि च । [पदातिके अमरः ।

**पदग** त्रि० पादेन गच्छति गम–ड पादस्य पद इत्यादेशः ।

**पदगोत्र** न०६त० । "भारद्वाजमाख्यातं भार्गवं नाम, वासिष्ठ उपसर्गः, निपातः काश्यपः" इत्येषु यजु० प्रातिशाख्योक्तेषु भारद्वाजादिषु पदानां गोत्रेषु । "चत्वारिपदजातानि आख्यातनामनिपातोपसर्गाः" इति निरुक्तोक्तानां च तेषां चतुर्णां भारद्वाजादिगोत्रत्वम् । [समूहे निरु० ।

**पदजात** न० ६त० । आख्यातनामनिपातोपसर्गरूपे शब्दे ।

**पदञ्जल** पु० ऋषिभेदे ततः उपका०गोत्रप्रत्ययस्य बहुत्वे लुक् ।

**पददेवता** स्त्री पदानां आख्यातादीनां देवता । आख्यातादीनां सोमादिषु देवतासु "सौम्यमाख्यातं नाम वायव्यमाग्नेय उपसर्गः निपातोवारुणः" वाजपेयिप्रतिशाख्यम् । ६।६१ [सू०६।११।१

**पदनिधन** न०पदमधिकृत्य निधनम् । सामभेदे लाट्यायनश्रौ०

**पदन्यास** पु० ६त० । १चरणार्पणे । पदस्येव न्यासोऽत्र । २गोक्षुरवृक्षे शब्दच० तन्त्रोक्ते अन्नपूर्णामन्त्रस्य पदानां तत्तदङ्गेषु ३न्यासे च यथाह तन्त्रसा०ज्ञानार्णवे "एकमेकं पुनश्चैकं पुनरेकं द्वयं ततः । चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्वति ! । पदान्येतानि देवेशि ! नवद्वारेषु विन्यसेत् । मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ! । गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्" । तदुक्तं तत्रैव "ब्रह्मरन्ध्रास्यहृदयमूलाधारेष्वनुक्रमात् । चतुर्वीजानि विन्यस्य परेष्वन्यांश्च विन्यसेत् । भ्रूमध्यनासिकाकण्ठनाभिलिङ्गेषु पञ्चसु । पूर्ववत् क्रमतो देवि ! नमःप्रभृतिकं न्यसेत्" । [पाठवताञ्च साम्नाम्" देवीमा० ।

**पदपाठ** पु० ६त० । वेदपदविभाजकग्रन्थभेदे "उद्गीथरस्य

**पदभञ्जन** न० पदानि भज्यन्तेऽनेन भञ्ज–करणे ल्युट् । १निरुक्तरूपे ग्रन्थे २गूढार्थव्याख्याने च [हेमच० ।

**पदभञ्जिका** स्त्री पदानि भनक्ति भञ्ज–ण्वुल् । टीप्पन्याम्

**पदमञ्जरी** स्त्री पदानां मञ्जरीव । न्यासापरनामके हरदत्तप्रणीते व्याकरणग्रन्थभेदे । [देवीपु० ८अ० ।

**पदमाला** स्त्री ६त० । १पदश्रेणौ २मोहननामविद्यायाम्

**पदवि(वी)** स्त्री पद–अवि वा ङीप् । १पथि । अमरः २धर्माचारे च । [२०३अ० ।

**पदविग्रह** पु० पदेन विग्रहो यत्र । समासे हरिवं०

**पदव्याख्यान** न० ६त० । वेदमन्त्रस्य विभाजकग्रन्थभेदे तस्य व्याख्यानो ग्रन्थः तत्र भवो वा ऋगयना० अण् । पादव्याख्यान तस्य व्याख्याने तत्रभवे च त्रि० ।

**पदष्ठीव** न० पादौ च अष्ठीवन्तौ च द्वन्द्व० नि० । पादजानुनोः समाहारे ।